INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

# नैषधीयचरिते अलङ्काराः

**आचार्यः के. राजगोपालन्**
आचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, अन्ध्रप्रदेशः

**उपोद्घातः**

**"तावद्भा भारवेर्भाति यावन्माघस्य नोदयः। उदिते नैषधे काव्ये क्व माघः क्व भारविः।"**

एवं लौकिककाव्यपरम्परायां महोत्कृष्टं काव्यं नैषधम्। तस्य प्रणेता श्रीहर्षः। कविरयं नैषधीयचरिते महाकाव्ये अन्ते "श्रीहर्षः कविराजिमुकुटालङ्कारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्॥" इत्यात्मनः परिचयं चकार। पिता श्रीहीरः माता च मामल्लदेवी। माता मामल्लदेवी वातापि नगरस्य समीपस्थस्य मामल्लपुरस्य निवासिनी बभूव। पिता श्रीहीरश्च श्रेष्ठः कविरासीत्।

नलदमयन्त्योः कथा भारते सुप्रसिद्धं वर्तते। सा कथा त्रेतायुगीयेति मन्यते। प्राचीनेयं कथा मत्स्य-स्कन्द-वायु-पद्म-अग्निपुराणेषु तथा च महाभारतेपि वर्तते। कथासरित्सागरे अपि सोमदेवभट्टस्य वर्तत इयं कथा। परं नैषधीयचरितस्य कथायाः उपजीव्यमस्ति महाभारतमेव।

महाभारतस्य वनपर्वे नवदशस्वध्यायेषु (५८-७८) नलोपाख्यानमस्ति। अस्योद्देश्यमस्ति धैर्यधारणाय प्रेरणादानम्। नलोऽनेका विपदः सोढ्वा ताश्च तीर्त्वा स्वराज्यं पुनरवाप्य पुण्यश्लोको बभूव। पाण्डवानामपि सदृशी विपदासीत्। सर्वमपि पराभूताः पाण्डवाः खिन्ना वनेष्वटन्तश्चासन्। भविष्यति जायमाने युद्धे विजयाय, अर्जुनश्च दिव्यास्त्रशस्त्रप्राप्तये तपसे अगच्छत्। किंकर्तव्यमूढं युधिष्ठिरं बृहदश्वो महर्षिः प्राप्तः। तं युद्धिष्ठिरं धैर्येण भवितुं नलोपाख्यानं नाम कथामश्रावयत्। सा हि कथा 'नैषधीयचरितम्' नाम्ना विरचिता श्रीहर्षेण। ततः अलङ्काराणां समाहारोऽत्र दृश्यते।

**विषयोपक्रमः**

**अर्थान्तरन्यासालङ्कारः**

"स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत।
त्यजन्त्यमून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्॥"[1]

**यतः मानिनः स्वप्राणान् सुखं च त्यक्तुमिच्छन्ति किन्तु अयाचितव्रतं तु न कदापि। सामान्यवाक्यमेतद् नलस्य विशेषस्य समर्थनेऽपि युक्त्वा अर्थान्तरन्यासं प्रस्तौति। लटि प्रयुक्तं सामान्यवाक्यमेव**

[1] नैषधीयचरितम् १/५०

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

**अलङ्कारकारकमित्यत्र नास्ति संशयः। त्यज धातोः लटि द्विवारं प्रयोगः। सामान्यतया श्लोकेष्वित्थं न भवति। केवलेन नकारस्य प्रयोगेण अध्याहृत्य पूरिताश्श्लोका अनेके सन्ति। परमत्र पादपूरणायैवेत्थमिति स्पष्टमेव।**

**उपमालङ्कारः**

“त्वदग्रसूच्या सचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशः पटौ।
स्फुटं स पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायते॥”[2]

**कामिनोर्मनोभवः केतकीपुष्पसूच्या दुर्यशः पटौ सीव्यतीति कथनेन कविः केतकीपुष्पैः कामिनां मनसि जायमानां व्यथां सूचयति। उत्प्रेक्षालङ्कारकारणम्। दारुणायते इति क्रियापदमुपमालङ्कारपोषकम्। इति मल्लिनाथः स चालङ्कारः हृद्दारुणादिति रूपकानुप्राणितेति तयोः सङ्करः।**

“निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम्।
तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः॥”[3]

**अनूपसर्गयुक्तं क्रियापदमत्र उपमालङ्कारकारकं न तु अगच्छन्निति विनोपसर्गप्रयोगः।**

**विरोधाभासालङ्कारः**

“राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यम्।
भुङ्क्ते श्रितश्रौत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमन्त्यम्॥”[4]

**इत्यत्र शेषाशेषयोः विरोधः। स च विरोधः पूर्ववाक्येन परिह्रियते। यत्र यज्ञयागान् सामाचर्य दानादिकञ्च कृत्वा यज्ञशेषमाज्यं भुङ्क्ते तथा च अर्पितानन्तरमवशिष्टमशेषं राज्यमुपभुङ्क्त इति। अत्र क्रियापदयोः अनुसन्धानैनेव विरोधस्य परिहारः। येन मल्लिनाथानुसारं विरोधाभासालङ्कारश्चेति।**

**उत्प्रेक्षालङ्कारः**

“निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे॥”[5]

**अत्र विधुर्निलीयते सूरे दर्शे कदापि समुद्रस्य पूरे (प्रवाहे) कदापि अभ्रभ्रमदभ्रगर्भे कदापीति। अमायां सूर्योदये, वर्षायां मेघावृते च चन्द्रस्यादर्शनं सहजमेव। किन्तु तस्य सहजस्य कार्यस्य ’निलीयते’ इति क्रियापदप्रयोगेण नलमुखसौन्दर्यश्रवणाल्लज्जायित-श्चन्द्रः पराभवबाधया यत्रकुत्रापि गोपायते इति चमत्करोति। येन उत्प्रेक्षालङ्कारकारणं भवति क्रियापदम्।**

**व्यतिरेकालङ्कारः**

“अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ।

---

[2] नैषधीयचरितम् १/८०

[3] नैषधीयचरितम् १/६५

[4] नैषधीयचरितम् ३/२४

[5] नैषधीयचरितम् ३/३३

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः॥"[6]

**भैमीं मुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महताः भैम्याः मुखश्रियं अम्बुजिन्यः याचन्तेत्यत्र सुन्दरीणां मुखस्य पद्मेन साम्यं सामान्यतया दृश्यते। अत्र उत्रेक्षा क्रियते यत् ताः कमलिन्यः इमां दमयन्तीं मुखश्रियं याचन्त इति। येन पद्मानामपेक्षया भैमीमुखपद्मस्यैव अतिशयत्वमिति कथने दातृगृहीतृवाचकं क्रियापदमिदं व्यतिरेकालङ्कारप्रतीतौ सहकारि।**

**सामान्यालङ्कारः**

"प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत्।
न शक्ष्यतो लक्षयितुं विमिश्रं दस्रौ सहस्रैरपि वत्सराणाम्॥"[7]

**यद्यश्विनौ तरुणसमूहं प्रवेक्ष्यतः तर्हि वर्षसहस्रैरपि दस्रौ लक्षयितुं न शक्ष्यतः इति कथनेन कविः तरुणानां सौन्दर्यातिशयं वर्णयति। अत्र तयोः सदृशाः सुन्दराः सर्वे इति ग्राह्यम्। अतिशयोक्तेः तथा च वृत्यनुप्रासकारकं क्रियपदम्। मल्लिनाथोऽत्र `सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति लक्षणेन सामान्यालङ्कार इति।**

**अतिशयोक्त्यलङ्कारः**

"हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्त्रीभवत्कौस्तुभम्।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति॥"[8]

**लक्ष्म्याः विष्णुवक्षस्थलं कमलञ्चेति वासद्वयम्। तयोः पुनर्गमनागमनकारणतः श्रान्ता सा काञ्चीशस्य भुजयोः विश्राम्यतीति वाच्यार्थः क्रियापदकृतविश्रान्त्यर्थादपेक्षया काञ्चीशस्य विष्णोरप्यधिकतया सम्पन्नतां व्यङ्क्ति यच्च अतिशयोक्त्यलङ्कारकारणञ्चास्ति क्रियापदम्।**

"अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः॥"[9]

**अत्र द्वाभ्यामपि क्रियापदाभ्यामात्मनः व्यतिरेकक्रियापरकत्वं केवलं चक्षुश्श्रवसो नागा इति कारणात्सम्पद्यते। नागकन्यास्ता नेत्रैर्नलं नापश्यन् किञ्च अशृण्वन्नतः स्तुवन्ति इति क्रियया श्रवणेन जातमानन्दं व्यनक्ति कविः। निन्दन्तीति पदेन चादर्शनेन जातामसुविधाञ्च। मल्लिनाथस्त्वत्र अतिशयोक्तिं वदति। यतः विद्याधरः गुणक्रियाविरोधालङ्कारं वदति।**[10]

---

[6] नैषधीयचरितम् ७/५७

[7] नैषधीयचरितम् १०/६४

[8] नैषधीयचरितम् १२/३७

[9] नैषधीयचरितम् १/२८

[10] जीवातुटीका १/२८

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

“दूरं गौरगुणैरहंकृतिभृतां जैत्राङ्ककारे चरत्येतदद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि।
धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते पीयूषस्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति॥”[11]

**उत्कलपतेर्यशसः कीर्तने, अतिशयोक्त्यलङ्कारप्रयोगः। तत्र क्रियापदानामुचितः प्रयोगः। कुमुदं बिभ्यन्न निद्राति। धम्मिले तव माला लीयते। तथाच चन्द्रः पीयूषस्रवकैतवात् स्विद्यति। त्रयाण्यपि कार्याणि सहजतया भवन्ति। तत्र यशसः सम्बन्धः नास्त्येव। असम्बन्धे सम्बन्धकथनादतिशयोक्तिः। क्रियापदगतौ यकारलकारावनुप्रासकारकौ।**

“अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन्।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि॥”[12]

**स्मरोत्र त्रिलोकविजयार्जितानि यशांसि नलस्य धैर्यस्य पुरतस्तिष्ठन्ति वेति मत्वा तानि संशयसागरे निमज्जयामास। यशसां निमज्जनं वस्तुतः भौतिकतयासम्भवमेव। असम्भवस्य कथनमतिशयोक्तिं व्यङ्क्तुमेव। क्रियया अन्ववगम्यमलङ्कारवैचित्र्यम्।**

**मीलनालङ्कारः**

“मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजाम्।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम्॥”[13]

**अत्र मल्लिनाथः जुगोपेत्यनेन तदङ्गगताभ्यां मृषाविशादचन्द्रभागपाण्डिमभ्यां तद्विरहश्वासपाण्डिम्नोः निगूहनात् मीलनालङ्कारः इति।” “मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्।” एवं निजावस्थां विरहजलज्जां गोपयितुमेव अपललाप न तु स्वभावेन।**

**स्वभावोक्त्यलङ्कारः।**

“अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः।
स तिर्यगावर्जितकंधरः शिरः पिधाय पक्षेण रतिक्लमालसः॥”[14]

**पक्षेण शिरः पिधाय क्षणं निदद्रौ इत्यत्र पक्षिस्वभावं यथातथमुक्त्वा स्वभावोक्त्यलङ्कारेण वर्णयति कविः।**

**उत्प्रेक्षालङ्कारः**

“तन्न्यस्तमाल्यस्पृशि यन्नलस्य स्वेदं करे पञ्चशरश्चकार।
भविष्यदुद्वाहमहोत्सवस्य हस्तोदकं तज्जनयांबभूव॥”[15]

---

[11] नैषधीयचरितम् १२/८४

[12] नैषधीयचरितम् १/४५

[13] नैषधीयचरितम् १/५१

[14] नैषधीयचरितम् १/१२१

[15] नैषधीयचरितम् १४/५३

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

**पञ्चशरः यन्नलस्य करयोः स्वेदं चकार तदत्र भविष्यदुद्वाहोत्सवस्य हस्तोदकं जनयाम्बभूव। अत्र स्वेदो नाम सात्विकभावः यन्नलस्य कण्ठे हस्तयोः मालया जायते स हस्तोदकवदूहितः। अत्र क्रियया उत्प्रेक्षालङ्कारः इति मल्लिनाथः व्यञ्जकाप्रयोगात्।**[16]

**क्रमालङ्कारः**

“सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधेश्वरौ नृपजनानिष्टोक्तिनिर्मृष्टये।
स्वानि स्वानि धराधिपाश्च शिबिराण्युद्दिश्य यान्तः
क्रमादेको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलम्॥”[17]

**अत्र चतुर्थे पादे प्रोक्तानि चकार सृजतः स्म आतेनिरे इति क्रियापदानि त्रिभ्यः पादेभ्यः क्रमशः युक्त्वा क्रमालङ्कार**[18]**सौन्दर्यं जनयन्ति।**

“बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन्।
उच्चैस्तु तच्चित्रममुष्य भग्नस्यालोक्यते निर्व्यथनं यदन्तः॥”[19]

**मृणालप्रियाबाह्वोर्युद्धे नाम साम्य इत्यर्थः। प्रियाया बाहू जयतामिति कथनं पुनश्च तत्पराभवेन भग्नस्य मृणालस्यान्तः (सहजछिद्रमत्र) निर्व्यथनमालोक्यत इति। अत्र विरोधाभासालङ्कारः। तत्र क्रियाभ्यां अलङ्कारार्थग्रहणात् क्रियापदयोर्वैचित्र्यम्। वस्तुतः ध्वनिस्तु तस्याः बाहू मृणालादपि सुकुमाराविति। विद्याधरोऽत्र समासोक्तिः श्लेषञ्च।” उभयोरलङ्कारयोः सङ्कर इति वक्तुं शक्यते।**

**तुल्ययोगितालङ्कारः**

“अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः॥”[20]

**क्ष्माभुजा नलेन दमयन्त्याः गुणः श्रवणातिथिरकारि। स्मरेण च शरासनाश्रयो गुणः श्रवणातिथिरकारि। इत्यत्र अकारि क्रियापदं नले स्मरे च प्रयुक्तं सत्तुल्ययोगितालङ्कारं व्यनक्ति।**

**भावोदयालङ्कारः**

“उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबापि दृष्टिः।

---

16 (पृ.सं. २४९)

17 नैषधीयचरितम् १४/९७

18 उद्देशक्रमतोऽर्थानां संबन्धो यत्र कथ्यते । प्राञ्चस्तत्र यथासंख्यमपरे क्रममूचिरे ॥ (अलङ्कारमणिहारः/५२)

19 नैषधीयचरितम् ७/६८

20 नैषधीयचरितम् १/४४

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि रोम॥"[21]

**अत्र 'यच्छेदेप्यबोधं लोम अहर्षि तदेवाश्माऽऽनर्ति' इति प्रयोगे लोम्नां पुलकितत्वे हर्षताया आरोपः अचेतनेष्वपि चेतनवत्प्रवृत्तिरित्यनुसृत्य नलस्पर्शनेन जातस्य रोमाञ्चस्य हर्षभावस्य प्रतीतौ उपयुक्तः।**

**एतत्सर्वमपि आश्चर्यजनकमासीद्यावदश्मनो नर्तनम्। अनयोः क्रिययोः समानाधिकरण्यानुपपत्तिकारणात् निदर्शनालङ्कार इति मल्लिनाथः। विद्याधरस्तु काव्यलिङ्गः क्रियाविरोधः भावोदयालङ्काराः।**

**रूपकालङ्कारः**

"अयोधि तद्धैर्यमनोभवाभ्यां तामेव भैमीमवलम्ब्य भूमिम्।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम्॥"[22]

**नलस्य मानसिकस्थितेः सुन्दरवर्णनात्मकमिदम् वाक्यम्। यत्र मानसिकविकारयोः धैर्यकामयोः सङ्घर्षः भैमीरूपरणरङ्गे जायते। तं सङ्घर्षं युद्धत्वेनोक्त्वा रूपकालङ्कारसिद्धौ सहकार्यभूदिदं क्रियापदम्।**

**सहोक्त्यलङ्कारः**

"पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः॥" [23]

**नारदीयमुदितं परिपीय पर्वतेन प्रतिनेदे। इन्द्राय स्वपक्षं नादर्शि च। अत्र श्लेषोक्तिरिति विद्याधरः पर्वतपक्षच्छेदित्वादिन्द्रस्याग्रे पर्वतेन स्वपक्षो न प्रकाशित इति ध्वनिरिति मल्लिनथः।[24] पर्वतस्य सहजः प्रतिनाद इत्थमूहित इति उत्प्रेक्षानुप्राणितः सहोक्तियुक्तः ध्वनिरिति मदभिप्रायः।**

**उपसंहारः**

नैषधं विद्वदौषधमिति प्रसिद्धिः। तत्र वस्तुतः बहूनामलङ्काराणां वैचित्र्यानां परिगणना कर्तुं शक्यते। परमत्र विशेषतया वाक्यार्थप्रधानतां उररीकृत्य अलङ्काराणां परिशीलनम् विहितमस्ति। अन्यत्र बहवोऽलङ्काराः कविनिबद्धाः सन्ति। तत्र नैषधं कविप्रोढोक्तेः उदाहरणत्वेनाऽपि वक्तुं शक्यते। अलङ्काराणां प्रयोगेऽपि तथैव दृश्यते।

**अनुबन्धग्रन्थसूची**

१. नैषधीयचरितम्। श्रीहर्षविरचितम्। मल्लिनाथकृतजीवातुव्याख्योपेतम्। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०६७

---

21 नैषधीयचरितम् ६/३४

22 नैषधीयचरितम् ८/५३

23 नैषधीयचरितम् ५/४४

24 जीवातुटीका ५/४४ पृ.सं. ५/३४

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:2(3), February: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd February 2023
Publication Date:10th March 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.02.64
www.ijmer.in

२. किरातार्जुनीयम्। भारविविरचितम्, मल्लिनाथकृतघण्टापथ-व्याख्योपेतम्। सम्पादकः डा. सुधाकरमालवीयः। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०७१

३. पाणिनीयः धातुपाठः - https://ashtadhyayi.com/dhatu

४. पाणिनीया अष्टाध्यायी। पाणिनिमुनिप्रोक्तम्। सम्पादकः – सत्यानन्द वेदवागीशः। वि.स. २०१७

५. काशिका वामनजयादित्यविरचिता। न्यास-पदमञ्जरी-भावबोधिनीसहिता। सम्पादको जयशङ्करलाल त्रिपाठी। प्रकाशकाः – तारा बुक एजन्सी, कमच्छा, वाराणसी, १९९१

६. शिशुपालवधम्। माघविरचितम्, मल्लिनाथकृतसर्वङ्कषाव्यख्यायुतम्।सम्पादकः डा. गजाननशास्त्री। प्रकाशकाः – चौखम्बा संस्कृतभवन , वाराणसी। वि.सं. २०६९

७. मनुस्मृतिः। सम्पादकः – पं तुलसीराम स्वामी। प्रकाशकाः – सार्वदेशिक आर्यप्रतिनिधि सभा। दरियागंज, दिल्ली। वि.सं. २०५९